# Mandalabrahmana Upanishad

# મણ્ડલબ્રાહ્મણોપનિષત્

## Document Information

Text title : Mandalabrahmana Upanishad

File name : mandala.itx

Category : upanishhat

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 48 / 108; Shukla Yajurveda - Yoga upanishad

Latest update : Mar. 17, 2000

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 1, 2025

*sanskritdocuments.org*

# મણ્ડલબ્રાહ્મણોપનિષત્

બાહ્યાન્તસ્તારકાકરં વ્યોમપઞ્ચકવિગ્રહમ્ ।
રાજયોગૈકસંસિદ્ધં રામચન્દ્રમુપાસ્મહે ॥

ૐ પૂર્ણમદઃ પૂર્ણમિદં પૂર્ણાત્પૂર્ણમુદચ્યતે ।
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ યાજ્ઞવલ્ક્યો હ વૈ મહામુનિરાદિત્યલોકં જગામ ।
તમાદિત્યં નત્વા ભો ભગવન્નાદિત્યાત્મતત્ત્વમનુબ્રૂહીતિ ।
સહોવાચ નારાયણઃ ।
જ્ઞાનયુક્તયમાદ્યષ્ટાઙ્ગયોગ ઉચ્યતે ।
શીતોષ્ણાહારનિદ્રાવિજયઃ સર્વદા શાન્તિર્નિશ્ચલત્વં
વિષયેન્દ્રિયનિગ્રહશ્ચૈતે યમાઃ ।
ગુરુભક્તિઃ સત્યમાર્ગાનુરક્તિઃ સુખાગતવસ્ત્વનુભવશ્ચ
તદ્વસ્ત્વનુભવેન તુષ્ટિર્નિઃસઙ્ગતા એકાન્તવાસો મનોનિવૃત્તિઃ
ફલાનભિલાષો વૈરાગ્યભાવશ્ચ નિયમાઃ ।
સુખાસનવૃત્તિશ્ચીરવાસાશ્ચૈવમાસનનિયમો ભવતિ ।
પૂરકકુમ્ભકરેચકૈઃ ષોડશચતુષ્ષષ્ટિ-
દ્વાત્રિંશત્સઙ્ખ્યયા યથાક્રમં પ્રાણાયામઃ ।
વિષયેભ્ય ઇન્દ્રિયાર્થેભ્યો મનોનિરોધનં પ્રત્યાહારઃ ।
સર્વશરીરેષુ ચૈતન્યૈકતાનતા ધ્યાનમ્ ।
વિષયવ્યાવર્તનપૂર્વકં ચૈતન્યે ચેતઃસ્થાપનં
ધારણં ભવતિ ।
ધ્યાનવિસ્મૃતિઃ સમાધિઃ ।
એવં સૂક્ષ્માઙ્ગાનિ । ય એવં વેદ સ મુક્તિભાગ્ભવતિ ॥ ૧॥

દેહસ્ય પઞ્ચદોષા ભવન્તિ કામક્રોધનિઃશ્વાસભયનિદ્રાઃ ।

તન્નિરાસસ્તુ નિઃસઙ્કલ્પક્ષમાલઘ્વાહારપ્રમાદતાતત્ત્વસેવનમ્ ।
નિદ્રાભયસરીસૃપં હિંસાદિતરઙ્ગં તૃષ્ણાવર્તં
દારપઙ્કં સંસારવાર્ધિં તર્તું સૂક્ષ્મમાર્ગમવલમ્બ્ય
સત્ત્વાદિગુણાનતિક્રમ્ય તારમવલોકયેત્ ।
ભ્રૂમધ્યે સચ્ચિદાનન્દતેજઃકૂટરૂપં તારકં બ્રહ્મ ।
તદુપાયં લક્ષ્યત્રયાવલોકનમ્ ।
મૂલાધારાદારભ્ય બ્રહ્મરન્ધ્રપર્યન્તં સુષુમ્ના સૂર્યાભા ।
મૃણાલતન્તુસૂક્ષ્મા કુણ્ડલિની । તતો તમોનિવૃત્તિઃ ।
તદ્દર્શનાત્સર્વપાપનિવૃત્તિઃ । તર્જન્યગ્રોન્મીલિતકર્ણરન્ધ્રદ્વયે
ફૂત્કારશબ્દો જાયતે । તત્ર સ્થિતે મનસિ ચક્ષુર્મધ્ય નીલજ્યોતિઃ
પશ્યતિ । એવં હૃદયેઽપિ । બહિર્લક્ષ્યં તુ નાસાગ્રે ચતુઃ-
ષડષ્ટદશદ્વાદશાઙ્ગુલીભિઃ ક્રમાન્નીલદ્યુતિશ્યામત્વ-
સદૃગ્રક્તભઙ્ગીસ્ફુરત્પીતવર્ણદ્વયોપેતં વ્યોમત્વં પશ્યતિ
સ તુ યોગી ચલનદૃષ્ટ્યા વ્યોમભાગવીક્ષિતુઃ પુરુષસ્ય
દૃષ્ટ્યગ્રે જ્યોતિર્મયૂખા વર્તન્તે । તદ્દૃષ્ટિઃ સ્થિરા ભવતિ ।
શીર્ષોપરિ દ્વાદશાઙ્ગુલિમાનજ્યોતિઃ પશ્યતિ તદાઽમૃતત્વમેતિ ।
મધ્યલક્ષ્યં તુ પ્રાતશ્ચિત્રાદિવર્ણસૂર્યચન્દ્રવહ્નિજ્વાલા-
વલીવત્તદ્વિહીનાન્તરિક્ષવત્પશ્યતિ ।
તદાકારાકારી ભવતિ । અભ્યાસાન્નિર્વિકારં
ગુણરહિતાકાશં ભવતિ । વિસ્ફુરત્તારકાકારગાઢ-
તમોપમં પરાકાશં ભવતિ । કાલાનલસમં
દ્યોતમાનં મહાકાશં ભવતિ । સર્વોત્કૃષ્ટ-
પરમાદ્વિતીયપ્રદ્યોતમાનં તત્ત્વાકાશં ભવતિ ।
કોટિસૂર્યપ્રકાશં સૂર્યાકાશં ભવતિ ।
એવમભ્યાસાત્તન્મયો ભવતિ । ય એવં વેદ ॥ ૨॥

તદ્યોગં ચ દ્વિધા વિદ્ધિ પૂર્વોત્તરવિભાગતઃ ।
પૂર્વં તુ તારકં વિદ્યાદમનસ્કં તદુત્તરમિતિ ।
તારકં દ્વિવિધમ્ । મૂર્તિતારકમમૂર્તિતારકમિતિ ।
યદિન્દ્રિયાન્તં તન્મૂર્તિતારકમ્ । યદ્ભ્રૂયુગાતીતં
તદમૂર્તિતારકમિતિ । ઉભયમપિ મનોયુક્તમભ્યસેત્ ।
મનોયુક્તાન્તરદૃષ્ટિસ્તારકપ્રકાશાય ભવતિ ।

ભ્રૂયુગમધ્યબિલે તેજસ આવિર્ભાવઃ । એતત્પૂર્વતારકમ્ ।
ઉત્તરં ત્વમનસ્કમ્ । તાલુમૂલોર્ધ્વભાગે મહાજ્યોતિર્વિદ્યતે ।
તદ્દર્શનાદણિમાદિસિદ્ધિઃ । લક્ષ્યેઽન્તર્બાહ્યાયાં
દૃષ્ટૌ નિમેષોન્મેષવર્જિતાયાં ચ ઇયં શામ્ભવી
મુદ્રા ભવતિ । સર્વતન્ત્રેષુ ગોપ્યમહાવિદ્યા ભવતિ ।
તજ્જ્ઞાનેન સંસારનિવૃત્તિઃ । તત્પૂજનં મોક્ષફલદમ્ ।
અન્તર્લક્ષ્યં જલજ્યોતિઃસ્વરૂપં ભવતિ । મહર્ષિવેદ્યં
અન્તર્બાહ્યેન્દ્રિયૈરદૃશ્યમ્ ॥ ૩॥

સહસ્રારે જલજ્યોતિરન્તર્લક્ષ્યમ્ । બુદ્ધિગુહાયાં
સર્વાઙ્ગસુન્દરં પુરુષરૂપમન્તર્લક્ષ્યમિત્યપરે ।
શીર્ષાન્તર્ગતમણ્ડલમધ્યગં પઞ્ચવક્ત્રમુમાસહાયં
નીલકણ્ઠં પ્રશાન્તમન્તર્લક્ષ્યમિતિ કેચિત્ ।
અઙ્ગુષ્ઠમાત્રઃ પુરુષોઽન્તર્લક્ષ્યમિત્યેકે ।
ઉક્તવિકલ્પં સર્વમાત્મૈવ । તલ્લક્ષ્યં શુદ્ધાત્મદૃષ્ટ્યા
વા યઃ પશ્યતિ સ એવ બ્રહ્મનિષ્ઠો ભવતિ । જીવઃ
પઞ્ચવિંશકઃ સ્વકલ્પિતચતુર્વિંશતિતત્ત્વં પરિત્યજ્ય
ષડ્વિંશઃ પરમાત્માહમિતિ નિશ્ચયાજ્જીવન્મુક્તો ભવતિ ।
એવમન્તર્લક્ષ્યદર્શનેન જીવન્મુક્તિદશાયાં સ્વયમન્તર્લક્ષ્યો
ભૂત્વા પરમાકાશાખણ્ડમણ્ડલો ભવતિ ॥ ૪॥

ઇતિ પ્રથમં બ્રાહ્મણમ્ ॥

અથ હ યાજ્ઞવલ્ક્ય આદિત્યમણ્ડલપુરુષં પપ્રચ્છ ।
ભગવન્નન્તર્લક્ષ્યાદિકં બહુધોક્તમ્ । મયા તન્ન
જ્ઞાતમ્ । તદ્બ્રૂહિ મહ્યમ્ । તદુહોવાચ પઞ્ચભૂત-
કારણં તડિત્કૂટાભં તદ્વચ્ચતુઃપીઠમ્ । તન્મધ્યે
તત્ત્વપ્રકાશો ભવતિ । સોઽતિગૂઢ અવ્યક્તશ્ચ ।
તજ્જ્ઞાનપ્લવાધિરૂઢેન જ્ઞેયમ્ । તદ્બાહ્યાભ્યન્તર્લક્ષ્યમ્ ।
તન્મધ્યે જગલ્લીનમ્ । તન્નાદબિન્દુકલાતીતમખણ્ડમણ્ડલમ્ ।
તત્સગુણનિર્ગુણસ્વરૂપમ્ । તદ્વેત્તા વિમુક્તઃ । આદાવગ્નિમણ્ડલમ્ ।
તદુપરિ સૂર્યમણ્ડલમ્ । તન્મધ્યે સુધાચન્દ્રમણ્ડલમ્ ।
તન્મધ્યેઽખણ્ડબ્રહ્મતેજોમણ્ડલમ્ । તદ્વિદ્યુલ્લેખાવચ્છુક્લ-
ભાસ્વરમ્ । તદેવ શામ્ભવીલક્ષણમ્ । તદ્દર્શને તિસ્રો મૂર્તય

અમા પ્રતિપત્પૂર્ણિમા ચેતિ । નિમીલિતદર્શનમમાદૃષ્ટિઃ ।
અર્ધોન્મીલિતં પ્રતિપત્ । સર્વોન્મીલનં પૂર્ણિમા ભવતિ । તાસુ
પૂર્ણિમાભ્યાસઃ કર્તવ્યઃ તલ્લક્ષ્યં નાસાગ્રમ્ । તદા
તાલુમૂલે ગાઢતમો દૃશ્યતે । તદભ્યાસાદખણ્ડમણ્ડલાકાર-
જ્યોતિર્દૃશ્યતે । તદેવ સચ્ચિદાનન્દં બ્રહ્મ ભવતિ । એવં
સહજાનન્દે યદા મનો લીયતે તદા શાન્તો ભવી ભવતિ । તામેવ
ખેચરીમાહુઃ । તદભ્યાસાન્મનઃસ્થૈર્યમ્ । તતો વાયુસ્થૈર્યમ્ ।
તચ્ચિહ્નાનિ । આદૌ તારકવદ્દૃશ્યતે । તતો વજ્રદર્પણમ્ । તત
ઉપરિ પૂર્ણચન્દ્રમણ્ડલમ્ । તતો વહ્નિશિખામણ્ડલં ક્રમાદ્દૃશ્યતે ॥ ૧॥

તદા પશ્ચિમાભિમુખપ્રકાશઃ સ્ફટિકધૂમ્ર-
બિન્દુનાદકલાનક્ષત્રખદ્યોતદીપનેત્રસવર્ણનવ-
રત્નાદિપ્રભા દૃશ્યન્તે । તદેવ પ્રણવસ્વરૂપમ્ ।
પ્રાણાપાનયોરૈક્યં કૃત્વા ધૃતકુમ્ભકો નાસાગ્ર-
દર્શનદૃઢભાવનયા દ્વિકરાઙ્ગુલિભિઃ ષણ્મુખી-
કરણેન પ્રણવધ્વનિં નિશમ્ય મનસ્તત્ર લીનં ભવતિ ।
તસ્ય ન કર્મલેપઃ । રવેરુદયાસ્તમયયોઃ કિલ કર્મ
કર્તવ્યમ્ । એવંવિદશ્ચિદાદિત્યસ્યોદયાસ્તમયાભાવા-
ત્સર્વકર્માભાવઃ । શબ્દકાલલયેન દિવારાત્ર્યતીતો ભૂત્વા
સર્વપરિપૂર્ણજ્ઞાનેનોન્મન્યવસ્થાવશેન બ્રહ્મૈક્યં
ભવતિ । ઉન્મન્યા અમનસ્કં ભવતિ । તસ્ય નિશ્ચિન્તા
ધ્યાનમ્ । સર્વકર્મનિરાકરણમાવાહનમ્ ।
નિશ્ચયજ્ઞાનમાસનમ્ । ઉન્મનીભાવઃ પાદ્યમ્ ।
સદાઽમનસ્કમર્ઘ્યમ્ । સદાદીપ્તિરપારામૃતવૃત્તિઃ
સ્નાનમ્ । સર્વત્ર ભાવના ગન્ધઃ । દૃક્સ્વરૂપાવસ્થાન-
મક્ષતાઃ । ચિદાપ્તિઃ પુષ્પમ્ । ચિદગ્નિસ્વરૂપં ધૂપઃ ।
ચિદાદિત્યસ્વરૂપં દીપઃ । પરિપૂર્ણચન્દ્રામૃતરસસ્યૈકીકરણં
નૈવેદ્યમ્ । નિશ્ચલત્વં પ્રદક્ષિણમ્ । સોઽહંભાવો નમસ્કારઃ ।
મૌનં સ્તુતિઃ । સર્વસન્તોષો વિસર્જનમિતિ ય એવં વેદ । ॥ ૨॥

એવં ત્રિપુટ્યાં નિરસ્તાયાં નિસ્તરઙ્ગસમુદ્રવન્નિવાત-
સ્થિતદીપવદચલસમ્પૂર્ણભાવાભાવવિહીનકૈવલ્યદ્યોતિર્ભવતિ ।
જાગ્રન્નિન્દ્રાન્તઃપરિજ્ઞાનેન બ્રહ્મવિદ્ભવતિ ।

સુષુપ્તિસમાધ્યોર્મનોલયાવિશેષેઽપિ મહદસ્ત્યુભયો-
ર્ભેદસ્તમસિ લીનત્વાન્મુક્તિહેતુત્વાભાવાચ્ચ । સમાધૌ
મૃદિતતમોવિકારસ્ય તદાકારાકારિતાખણ્ડાકાર-
વૃત્ત્યાત્મકસાક્ષિચૈતન્યે પ્રપઞ્ચલયઃ સમ્પદ્યતે
પ્રપઞ્ચસ્ય મનઃકલ્પિતત્વાત્ । તતો ભેદાભાવાત્કદાચિ-
દ્બહિર્ગતેઽપિ મિથ્યાત્વભાનાત્ । સકૃદ્વિભાતસદાનન્દા-
નુભવૈકગોચરો બ્રહ્મવિત્તદેવ ભવતિ । યસ્ય સઙ્કલ્પનાશઃ
સ્યાત્તસ્ય મુક્તિઃ કરે સ્થિતા । તસ્માદ્ભાવાભાવૌ પરિત્યજ્ય
પરમાત્મધ્યાનેન મુક્તો ભવતિ । પુનઃપુનઃ સર્વાવસ્થાસુ
જ્ઞાનજ્ઞેયૌ ધ્યાનધ્યેયૌ લક્ષ્યાલક્ષ્યે દૃશ્યાદૃશ્યે
ચોહાપોહાદિ પરિત્યજ્ય જીવન્મુક્તો ભવેત્ । ય એવં વેદ ॥ ૩॥

પઞ્ચાવસ્થાઃ જાગ્રત્સ્વપ્નસુષુપ્તિતુરીયતુરીયાતીતાઃ ।
જાગ્રતિ પ્રવૃત્તો જીવઃ પ્રવૃત્તિમાર્ગાસક્તઃ ।
પાપફલનરકાદિમાંસ્તુ શુભકર્મફલસ્વર્ગમસ્ત્વિતિ
કાઙ્ક્ષતે । સ એવ સ્વીકૃતવૈરાગ્યાત્કર્મફલજન્માઽલં
સંસારબન્ધનમલમિતિ વિમુક્ત્યભિમુખો નિવૃત્તિમાર્ગ-
પ્રવૃત્તો ભવતિ । સ એવ સંસારતારણાય ગુરુમાશ્રિત્ય
કામાદિ ત્યક્ત્વા વિહિતકર્માચરન્સાધનચતુષ્ટયસમ્પન્નો
હૃદયકમલમધ્યે ભગવત્સત્તામાત્રાન્તર્લક્ષ્યરૂપમાસાદ્ય
સુષુપ્ત્યવસ્થાયા મુક્તબ્રહ્માનન્દસ્મૃતિં લબ્ધ્વા
એક એવાહમદ્વિતીયઃ કઞ્ચિત્કાલમજ્ઞાનવૃત્ત્યા
વિસ્મૃતજાગ્રદ્વાસનાનુફલેન તૈજસોઽસ્મીતિ તદુભયનિવૃત્ત્યા
પ્રાજ્ઞ ઇદાનીમસ્મીત્યહમેક એવ સ્થાનભેદાદવસ્થાભેદસ્ય
પરંતુ નહિ મદન્યદિતિ જાતવિવેકઃ શુદ્ધાદ્વૈતબ્રહ્માહમિતિ
ભિદાગન્ધં નિરસ્ય સ્વાન્તર્વિજૃમ્ભિતભાનુમણ્ડલધ્યાન-
તદાકારાકારિતપરંબ્રહ્માકારિતમુક્તિમાર્ગમારૂઢઃ
પરિપક્વો ભવતિ । સઙ્કલ્પાદિકં મનો બન્ધહેતુઃ । તદ્વિયુક્તં
મનો મોક્ષાય ભવતિ । તદ્વાંશ્ચક્ષુરાદિબાહ્યપ્રપઞ્ચરતો
વિગતપ્રપઞ્ચગન્ધઃ સર્વજગદાત્મત્વેન પશ્યંસ્ત્યક્તાહઙ્કારો
બ્રહ્માહમસ્મીતિ ચિન્તયન્નિદં સર્વં યદયમાત્મેતિ
ભાવયન્કૃતકૃત્યો ભવતિ ॥ ૪॥

સર્વપરિપૂર્ણતુરીયાતીતબ્રહ્મભૂતો યોગી ભવતિ ।
તં બ્રહ્મેતિ સ્તુવન્તિ । સર્વલોકસ્તુતિપાત્રઃ સર્વદેશ-
સંચારશીલઃ પરમાત્મગગને બિન્દું નિક્ષિપ્ય
શુદ્ધાદ્વૈતાજાડ્યસહજામનસ્કયોગનિદ્રાખણ્ડા-
નન્દપદાનુવૃત્ત્યા જીવન્મુક્તો ભવતિ । તચ્ચાનન્દ-
સમુદ્રમગ્ના યોગિનો ભવન્તિ । તદપેક્ષયા ઇન્દ્રાદયઃ
સ્વલ્પાનન્દાઃ । એવં પ્રાપ્તાનન્દઃ પરમયોગી ભવતીત્યુપનિષત્ ॥ ૫॥

ઇતિ દ્વિતીયં બ્રાહ્મણમ્ ॥ ૨॥

યાજ્ઞવલ્ક્યો મહામુનિર્મણ્ડલપુરુષં પપ્રચ્છ
સ્વામિન્નમનસ્કલક્ષણમુક્તમપિ વિસ્મૃતં
પુનસ્તલ્લક્ષણં બ્રૂહીતિ । તથેતિ મણ્ડલપુરુષોઽબ્રવીત્ ।
ઇદમમનસ્કમતિરહસ્યમ્ । યજ્જ્ઞાનેન કૃતાર્થો
ભવતિ તન્નિત્યં શાંભવીમુદ્રાન્વિતમ્ । પરમાત્મદૃષ્ટ્યા
તત્પ્રત્યયલક્ષ્યાણિ દૃષ્ટ્વા તદનુ સર્વેશમપ્રમેયમજં
શિવં પરમાકાશં નિરાલમ્બમદ્વયં બ્રહ્મવિષ્ણુરુદ્રાદીના-
મેકલક્ષ્યં સર્વકારણં પરંબ્રહ્માત્મન્યેવ પશ્યમાનો
ગુહાવિહરણમેવ નિશ્ચયેન જ્ઞાત્વા ભાવાભાવાદિદ્વન્દ્વાતીતઃ
સંવિદિતમનોન્મન્યનુભવસ્તદનન્તરમખિલેન્દ્રિયક્ષયવશાદમનસ્ક-
સુખબ્રહ્માનન્દસમુદ્રે મનઃપ્રવાહયોગરૂપનિવાતસ્થિતદીપવદચલં
પરંબ્રહ્મ પ્રાપ્નોતિ । તતઃ શુષ્કવૃક્ષવન્મૂર્ચ્છાનિદ્રામય-
નિઃશ્વાસોચ્છ્વાસાભાવાન્નષ્ટદ્વન્દ્વઃ સદાચઞ્ચલગાત્રઃ
પરમશાન્તિં સ્વીકૃત્ય મનઃ પ્રચારશૂન્યં પરમાત્મનિ લીનં ભવતિ ।
પયસ્રાવાનન્તરં ધેનુસ્તનક્ષીરમિવ સર્વેન્દ્રિયવર્ગે પરિનષ્ટે
મનોનાશં ભવતિ તદેવામનસ્કમ્ । તદનુ નિત્યશુદ્ધઃ
પરમાત્માહમેવેતિ તત્ત્વમસીત્યુપદેશેન ત્વમેવાહમહમેવ
ત્વમિતિ તારકયોગમાર્ગેણાખણ્ડાનન્દપૂર્ણઃ કૃતાર્થો ભવતિ ॥ ૧॥

પરિપૂર્ણપરાકાશમગ્નમનાઃ પ્રાપ્તોન્મન્યવસ્થઃ
સંન્યસ્તસર્વેન્દ્રિયવર્ગઃ અનેકજન્માર્જિતપુણ્યપુઞ્જપક્વ-
કૈવલ્યફલોઽખણ્ડાનન્દનિરસ્તસર્વક્લેશકશ્મલો બ્રહ્માહમસ્મીતિ
કૃતકૃત્યો ભવતિ । ત્વમેવાહં ન ભેદોઽસ્તિ પૂર્ણત્વાત્પરમાત્મનઃ ।
ઇત્યુચ્ચરન્ત્સમાલિઙ્ગ્ય શિષ્યં જ્ઞપ્તિમનીનયત્ ॥ ૨॥

ઇતિ તૃતીયં બ્રાહ્મણમ્ ॥ ૩॥

અથ હ યાજ્ઞવલ્ક્યો મણ્ડલપુરુષં પપ્રચ્છ
વ્યોમપઞ્ચકલક્ષણં વિસ્તરેણાનુબ્રૂહીતિ । સ
હોવાચાકાશં પરાકાશં મહાકાશં
સૂર્યાકાશં પરમાકાશમિતિ પઞ્ચ ભવન્તિ ।
બાહ્યાભ્યન્તરમન્ધકારમયમાકાશમ્ ।
બાહ્યસ્યાભ્યન્તરે કાલાનલસદૃશં પરાકાશમ્ ।
સબાહ્યાભ્યન્તરેઽપરિમિતદ્યુતિનિભં તત્ત્વં મહાકાશમ્ ।
સબાહ્યાભ્યન્તરે સૂર્યનિભં સૂર્યાકાશમ્ ।
અનિર્વચનીયજ્યોતિઃ સર્વવ્યાપકં નિરતિશયાનન્દલક્ષણં
પરમાકાશમ્ । એવં તત્તલ્લક્ષ્યદર્શનાત્તત્તદ્રૂપો ભવતિ ।
નવચક્રં ષડાધારં ત્રિલક્ષ્યં વ્યોમપઞ્ચકમ્ ।
સમ્યગેતન્ન જાનાતિ સ યોગી નામતો ભવેત્ ॥ ૧॥

ઇતિ ચતુર્થં બ્રાહ્મણમ્ ॥ ૪॥

સવિષયં મનો બન્ધાય નિર્વિષયં મુક્તયે ભવતિ ।
અતઃ સર્વં જગચ્ચિત્તગોચરમ્ । તદેવ ચિત્તં નિરાશ્રયં
મનોન્મન્યવસ્થાપરિપક્વં લયયોગ્યં ભવતિ । તલ્લયં
પરિપૂર્ણે મયિ સમભ્યસેત્ । મનોલયકારણમહમેવ ।
અનાહતસ્ય શબ્દસ્ય તસ્ય શબ્દસ્ય યો ધ્વનિઃ ।
ધ્વનેરન્તર્ગતં જ્યોતિર્જ્યોતિરન્તર્ગતં મનઃ ।
યન્મનસ્ત્રિજગત્સૃષ્ટિસ્થિતિવ્યસનકર્મકૃત્ ।
તન્મનો વિલયં યાતિ તદ્વિષ્ણોઃ પરમં પદમ્ ।
તલ્લયાચ્છુદ્ધાદ્વૈતસિદ્ધિર્ભેદાભાવાત્ ।
એતદેવ પરમતત્ત્વમ્ । સ તજ્જ્ઞો બાલોન્મત્ત-
પિશાચવજ્જડવૃત્ત્યા લોકમાચરેત્ એવમમનસ્કાભ્યાસેનૈવ
નિત્યતૃપ્તિરલ્પમૂત્રપુરીષમિતભોજનદૃઢાઙ્ગા-
જાડ્યનિદ્રાદૃગ્વાયુચલનાભાવબ્રહ્મદર્શનાજ્જ્ઞાત-
સુખસ્વરૂપસિદ્ધિર્ભવતિ । એવં ચિરસમાધિજનિત-
બ્રહ્મામૃતપાનપરાયણોઽસૌ સંન્યાસી પરમહંસ
અવધૂતો ભવતિ । તદ્દર્શનેન સકલં જગત્પવિત્રં ભવતિ ।

તત્સેવાપરોઽજ્ઞોઽપિ મુક્તો ભવતિ । તત્કુલમેકોત્તરશતં તારયતિ ।
તન્માતૃપિતૃજાયાપત્યવર્ગં ચ મુક્તં ભવતીત્યુપનિષત્ ॥

ૐ પૂર્ણમદઃ પૂર્ણમિદં પૂર્ણાત્પૂર્ણમુદચ્યતે ।
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇતિ મણ્ડલબ્રાહ્મણોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

*Mandalabrahmana Upanishad*
pdf was typeset on April 1, 2025

Please send corrections to *sanskrit@cheerful.com*